स्नाव्य विपचेद्द्याद्वात पिप्पलीमूलतण्डुलीयकवराङ्ग-चोचकर्माञ्जिष्ठाकरञ्जिकाहस्तिपिप्पलीमरिचोत्पलसारिवाविडङ्गगृहधूमानन्तासोमसरलावाह्लीकगुहाकोशाम्र-श्वेतसर्षपवरुणलवणाम्लवनिचुलकवन्दमानवञ्जुलपुत्रश्रेणी-सप्तपर्णदन्दकैलवालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठ-हरिद्रावचाचूर्णानि लोहानाञ्च समभागानि ततः क्षार-वदागतपाकमवतार्य लोहकुम्भे निदध्यात्। अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च। श्रवणाद्दर्श-नात् स्पर्शात् विषात् सम्प्रतिमुच्यते। एष क्षारागदो नाम शर्कराखश्मरीषु च। अर्शःसु वातगुल्मेषु कास-शूलोदरेषु च। अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे। एष सर्वविषार्त्तानां सर्वथैवोपयुज्यते। तथा तक्ष-कमुख्यानामयं दर्पाङ्कुशोऽगदः"।

**दुन्दुभ्य** पु० दुन्दुभौ दानवभेदे विष्णे वाद्यभेदे वा भवः प्रसूतो वा यत्। १रुद्रभेदे "नमो दुन्दुभ्याय वन्याय च" यजु० १६।३५ दुन्दुभये तद्वादनाय साधु यत्। २दुन्दुभिवादन साधने मन्त्रभेदे "ऐन्द्राः क्षत्रियस्य चक्रदुन्दुभ्याः" कात्या०श्रौ० १४।३।१२ "क्षत्रियस्य चक्रारोहणे दुन्दु-भेर्वादनमन्त्रा ऐन्द्रा भवन्ति" कर्कः।

**दुन्दुमार** पु० धुन्धुमार+पृषो०। धुन्धुमारदेशे शब्दार्थकल्प०।

**दुफानिकुत्थ** न० नी० ता० उक्ते वर्षप्रवेशे योगभेदे तल्ल-क्षणं यथोक्तं यथा "मन्दः शुभोच्चादिपदस्थितश्चेत् पदोनशीघ्रेण कृतेत्थशालः। तत्रापि कार्यं भवतीति वाच्यं वक्रादिनिर्वीर्यपदेन चेत् स्यात्"।

**दुम्बक** पु० (दुम्बा) इति ख्याते मेषभेदे शब्दार्थचि०।

**दुर्(स्)** अव्य०दु-रुक् सुक् वा। १दुष्टे २निन्दायां ३निषेधे ४दुःखे च पुरुषोत्तमः ५ईषदर्थे ६कष्टार्थे ७अभ्रो ८असम्पत्तौ ९सङ्कटे च गणर०दुर्जीवनः दुर्बलः दुर्दिनम् "सुदुरोरधिकरणे" पा०दुष्कृतम्। क्रियायोगेऽस्योपसर्गता उपसर्गशब्दे १२२५पृ० दृश्यम्।

**दुर्** स्त्री दृ-क्विप्। द्वारे "दुरोघ्यूतान्यद्वरम्" ऋ० १।१८८।५ "या दुरः यज्ञगृहद्वारः" भा० दुरो मानुषो देव आ व" ऋ०५।४५।१ "मानुषीर्मनुष्य सम्बन्धिनीर्दुरः द्वारः" भा०

**दुर** त्रि० दु-बा० कुरं। दातरि "दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः" ऋ०।।५३।२ "दुरो दातासि" भा०

**दुरक्ष** पु० दुष्टोऽक्षः प्रा०स०। १कपटपाशके २दुष्टनेत्रे च "अक्षै पुरुषस्याक्षि प्रथाक्षमेति ह स्माह याज्ञवल्क्यो दुरक्ष इव ह्यास पूयो हैवास्य दूषीका ते एवैतदनक्त्यक्षि-रोति यदक्ष्यावनक्ति" शत०ब्रा० ३।१।३।१० "दुरक्षमेव अञ्जनेन नाशयति" भा० ६ब०। दुष्टमक्षि यस्य षच् समा। ३तद्युक्ते त्रि० "अश्वः शुक्ल उ दुष्टमुख इवाथो ह दुरक्षो भावु-कस्तस्य" शत०ब्रा० ७।३।२।१४ दुष्टोऽक्षो यत्र। ४दुष्टद्यूते

**दुरतिक्रम** त्रि०दुःखेनातिक्रम्यतेऽसौ दुर्+अति+क्रम-कर्मणि खल्। १दुःखेनातिक्रमणीये २दुर्लङ्घ्ये "सर्वन्तु तपसा-साध्यं तपो हि दुरतिक्रमम्" मनुः। ३विष्णौ पु० "समा वर्त्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः" विष्णु०सं० "भयहेतुत्वादस्याज्ञा सूर्यादयो नातिक्रामन्तीति दुरतिक्रमः "भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" इति मन्त्रव-र्णात्" भा० "तस्याज्ञाया दुर्लङ्घ्यत्वात् तस्य तथात्वम्।

**दुरत्यय** त्रि०दुःखेनातीयते दुर्+अति-इ-खल्। १दुरतिक्र-मणीये २दुस्तरे च। "स्वर्गमार्गपरिघो दुरत्ययः" रघुः।

**दुरत्येतु** त्रि० दुर्+अति+इ-कर्मणि-तुन्। दुरतिक्रमणीये "ता भूरि पाशावन्तस्य सेतू दुरत्येतू रिपवे मर्त्याय" ऋ० ७।६५।३ "दुरत्येतू दुरतिक्रमणीयौ" भा०

**दुरदृष्ट** न० दुष्टमदृष्टम् प्रा०स०। दुर्भाग्ये पापे।

**दुरद्मनी** स्त्री अद-भावे मनिन् वा ङीप् दुष्टा अद्मनिः (नी) प्रा०स०। दुर्भोजने। "पाहि दुरद्मन्या अविषं नः पितुम्" यजु० २।२०। "अदनमद्मनी दुष्टा अद्मनी दुरद्मनी दुर्भोजनम् ततः मां पाहि चतुर्थी पञ्चम्यर्थे" वेददी०।

**दुरधिग** त्रि० दुःखेनाधिगम्यतेऽसौ दुर्+अधि+गम-बा० कर्मणि ड। १दुष्प्रापे २दुर्ज्ञेये च। "दिव्यास्त्रैर्दुरधि-गान् नृप! विक्रियाभिः" भाग० ३।२३।८।

**दुरधिगम** त्रि० दुःखेनाधिगम्यते दुर्+अधि+गम-कर्मणि खल्। १दुष्प्रापे २दुर्ज्ञेये च। "द्रव्यदेशकालमन्त्रर्त्वि-ग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान्" भाग०५।३।२ "इह दुरधिगमैः किञ्चिदेवागमैः" किरा०।

**दुरधीत** न० दुष्टमधीतम् प्रा०स०। वर्णानां यथास्थानानु-च्चारणेन यथास्वरानुच्चारणेन च अध्ययने "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपरा-धादिति" दुष्टाञ्छब्दान्मा प्रयुञ्ज्महीत्यध्येयं व्या-करणम्" महाभाष्योक्तेः "यदधीतमविज्ञातं निगदेनैव शब्द्यते। सोऽनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" श्रुतेश्चाध्ययनस्य दुष्टत्वं बोध्यम्। [अध्येतुरशक्त्या

**दुरध्यय** त्रि० दुःखेनाधीयते कष्टार्थे दुर्+अधि+इ-खल्।